# वेदे संवत्सरविज्ञानम्

डॉ. दे.दयानाथः

अध्ययनविधेरर्थग्रहणपर्यन्तं तात्पर्यात् इति ऋग्वेदभाष्यभूमिकायां सायणः। अर्थग्रहणं तु वेदाङ्गानामध्ययनं विना न सम्भवति। अतएव षडङ्गो वेदोऽयेयो ज्ञेयश्च इति श्रुतिः। षडङ्गेषु ज्योतिषमन्यतमम्। षट्स्वङ्गोविदं प्रधानमिदमप्रधानमिदं गौणमिति विचार एवं अनुचितः। सर्वाण्यप्यङ्गानि वेदार्थावगमने समानरुपेणोपयुक्तानि। किन्तु निर्मूलं शास्त्राध्ययनम् अर्थात् मूलस्य वेदस्याध्ययनेन विना क्रियमाणं शास्त्राध्ययनं व्यर्थमेव इति निश्चप्रचं मतम् ऋषीणां महर्षीणामाचार्याणाञ्च।

वेदाङ्गेषु प्रत्यक्षं ज्योतिषं शास्त्रमिति प्रथमानं ज्योतिषशास्त्रं वेदपुरुषस्य नेत्ररुपतां भजते। तथा च विना ज्योतिषं धर्माचरणमर्थात् यागादीनामनुष्ठानं न सम्भवत्येव। विविधयागानामनुष्ठाने तिथिनक्षत्रादीनां ज्ञानं सुतरामावश्यकम्। सोमयागः, दर्शपूर्णमासयागः, राजसूयः इत्यादीनां समनुष्ठाने अवान्तर क्रियाणां निर्वर्तने च ज्योतिषशास्त्रं बहुधा उपकरोति। वेदाङ्गज्योतिषस्य प्रधानमुद्देश्यं कर्मानुष्ठानयोग्यकालनिर्धारणमेव, न तु फलादेशकथनम्।

भारतीयं ज्योतिषशास्त्रमत्यन्तं वैज्ञानिकम्, अर्वाचीनखगोलादिशास्त्रेभ्य उत्तमञ्च वर्तते। एतस्य शास्त्रस्य मूलं वेद एवेति बहुभिः प्रमाणैः ज्ञायते। छायाग्रहविज्ञानं सर्वादौ ग्राव्णो ब्रह्मा युयुजानः सपर्यन् कीरिणा देवान्नमसोपशिक्षन्। अत्रिः सूर्यस्य दिवि चक्षुराधात्स्वर्भानोरप माया अघुक्षत् ॥ (ऋ. 10.40.8) इत्यादिभिः ऋचाभिः प्रमाणितं वर्तते। अर्वाचीनकाले दृश्यमानः कालविभागः दिनवारपक्षमासवर्षरूपः वेदेष्वेवोपलभ्यते। यथा - शतमानं भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रतितिष्ठति (तै.सं. - 6.6.10) इति श्रुतिः आयुषः शतमाननिरुपणप्रसङ्गेन शतवर्षाणां गणना दर्शयति। किञ्च वर्षपर्यायत्वेन 'शरत्' इति शब्दः वेदेषु प्रयुक्तः दृश्यते। शरदृतुः वर्ष एकवारमेवागच्छतीति कारणात् 'शरत्' शब्दः वर्षपर्यायः दृश्यते। तद्यथा - पश्येम शरदश्शतं जीवेम शरदश्शतं नन्दाम शदश्शतं मोदाम शरदश्शतं भवाम शरदश्शतशृणवाम शरदश्शतं प्रब्रवाम शरदश्शतमजीताः स्याम शरदश्शतं (तै.आ. 4.42) इति श्रुतिः सूर्योपासनकाल सूर्यदर्शनाभिलाषं कालपरिगणनया निरुपयति। किञ्च कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः (वा. सं. ४०.२) इति वाजसनेयिसंहितायामपि श्रूयते। अत्र 'समा' इति शब्दः वर्षार्थे प्रयुक्तः। तदेव च समानां मास आकृतिः (ऋ. १०.८५.५)इति वर्षपर्यायत्वेन समशब्दः प्रयुक्तः, तस्यान्तर्भागः मासरूपेण जायते इत्यपि इयं श्रुतिः निश्चिनोति। किञ्च वेद मासो धृतव्रतो द्वादश प्रजावतः। वेदा य उपजायते ॥ इति ऋक्संहिता। (ऋ.१.१२५.८)। धृतव्रतः वरुणः द्वादश मासान् तेषु उत्पद्यमानान् प्राणिनः अपि जानाति इति, एषु मासेषु

अन्तर्गतमधिमासमपि जानाति इति एतस्य मन्त्रस्यार्थः। अस्यामृचि यद्यप्यधिमासस्य साक्षादुल्लेखः न दृश्यते तथापि सायणादिभाष्येषु एष अर्थ एव दर्शितः। एतेन वर्षे द्वादश मासाः क्वचिदधिकमासः अपि इति विज्ञानमत्रावगम्यते।

आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः (ऋ.१.१६४.११) इति ऋक्संहिता सूर्यस्य द्वादश अराणि चक्राणि द्युलोकं परितः भ्रमणं कुर्वन्ति अपि नष्टं नहि यान्ति। अस्मिन् चक्रे ७२० विंशत्यधिकसप्तशतं युगलानि आरुढानि इति। अपि च द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि (ऋ.१.१६४.४८) इत्यपि ऋक्। एतयोः ऋङ्मन्त्रयोः तात्पर्यं भवति संवत्सररूपिणि चक्रे द्वादश मासाः भवन्ति ३६० दिवसाश्च इति। रात्रिः दिनमिति एतयोः मिथुनयोः संख्या भवति ७२० इति एतेन वर्षविज्ञानमृग्वेदे स्पष्टं निरुपितं दृश्यते। तैत्तिरीयसंहितायामेवं श्रूयते - मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चेषचोर्जश्च सहश्च सहस्यश्च तपश्च तपस्यश्चोपयामगृहीतोऽसि संसर्पोऽस्यंहस्पत्याय त्वा। (तै.सं.१.४.१४) इति। अत्र मधुः माधवः शुक्रः शुचिः नभः नभस्यः इषः ऊर्जः सहः सहस्यः तपः तपस्यः इति मासानां द्वादश नामानि दृश्यन्ते। एतेन एकस्मिन् वर्षे द्वादश मासाः इति वेदः स्पष्टं वदति। अत्रैव संसर्प इति अंहस्पत्य इति च पदद्वयं वर्तते। अत्र सायणाचार्यः संसर्प इत्यस्य अधिमास इति अहंस्पति इत्यस्य क्षयमास इति च भाष्यं करोति। एतेन अधिकमास-क्षयमासानां विज्ञानं वेदमूलमिति स्पष्टं भवति।

किञ्च - मधुश्च माधवश्च वासन्तिकावृतू शुक्रञ्च शुचिश्च ग्रैष्मावृतू नभश्च नभस्यञ्च वार्षिकावृतू इषश्चोर्जश्चू शारदावृत् सहश्च सहस्यश्च हैमन्तिकावृतू तपश्च तपस्यश्च शैशिरावृतू। (तै.सं.४.४.११) इति तैत्तिरीयसंहितायाम् ऋतूनां प्रकल्पनं दृश्यते। तथा च मधुमाधवौ वसन्तर्तुः, शुक्रशुची ग्रीष्मर्तुः, नभोनभस्यौ वर्षर्तुः, इषोर्जौ शरदृतुः, सहस्सहस्यौ हेमन्तर्तुः, तपस्तपस्यौ शिशिरर्तुः इति प्रविभागः स्पष्टं श्रूयते। एवं षड्रात्रीः दीक्षितः स्यात्, द्वादश रात्रीर्दीक्षितः स्यात्, पञ्चदश रात्रीर्दीक्षितः स्यात् संवत्सर आप्यते मासं दीक्षितः स्याद्यो मासः स संवत्सरः। (तै.सं. ५.६.७) इत्यपि प्रविभागा उपलभ्यन्ते।

इत्थं तिथि-वार-पक्ष-मास-संवत्सराणां तत्र ऋतूनां प्रविभागः मासानां नामानि ऋतूनाञ्च नामानि वेदे एव स्पष्टं निरुपितानि। तथा च ज्योतिषशास्त्रस्य मूलभूतं यत्तत्वं तिथि-वार-पक्ष-मास-संवत्सरेति वेदे एव स्पष्टं निरुपितं तथा तत्सर्वं वेदमूलम्। एतस्य अङ्गस्य उपयोगः यागादीनामनुष्ठानेनैव परिमितः। तदग्रे एतस्याङ्गस्य विकासः फलादेशादिः एतस्यैव प्रपश्चः इति निश्चयेन वक्तुं शक्यते। तथा च वेदाङ्गज्योतिषस्य क्षेत्रम् यागाद्यनुष्ठानेन परिमितमिति शम्।

*सहायकाचार्यः(सं), वेदविभागः,*
*राष्ट्रियसंस्कृतसंस्थानम्,(समविश्वविद्यालयः)*
*श्रीरणवीरपरिसरः, कोट-भलवाल*
*जम्मूः-१८११२२*